॥ श्री गुरुभ्यो नमः । हरिः ॐ ॥

ॐ

# श्री वरसिद्धि विनायक पूजा विधानम्

ध्रुवन्ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
द्रुवन्त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवं ॥
सुलग्ना सावाधान । सुमुहूर्ता सवाधाना । श्री महागणपति ध्याना सावधाना ।

अथ घण्ठानादः

**आगमार्थं तु देवानां गमनार्थं तु रक्षसां ।**
**कुर्वे घण्टारवं तत्र देवताह्वानलाञ्छनम् ॥**

अथ गणेश प्रार्थना

**शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ।**
**प्रसन्न वदनं ध्यायेत् सर्वविघ्नोपशांतये ॥**

**ॐ सुमुखाय नमः । ॐ एकदन्ताय नमः । ॐ कपिलाय नमः ।**
**ॐ गजकर्णकाय नमः । ॐ लंबोदराय नमः । ॐ विकटाय नमः ।**
**ॐ विघ्नराजाय नमः । ॐ गणाध्यक्षाय नमः । ॐ धूमकेतवे नमः ।**
**ॐ गणाधिपाय नमः । ॐ फालचन्द्राय नमः । ॐ गजाननाय नमः ।**
ॐ श्री महागणपतये नमः – नाम पूजां समर्पयामि ।
ॐ श्री महागणपतये नमः – नानाविध पत्र पुष्पाणि समर्पयामि ।
ॐ श्री महागणपतये नमः - धूपमाघ्रापयामि ।
ॐ श्री महागणपतये नमः - दीपं दर्शयामि ।
ॐ श्री महागणपतये नमः - नैवेद्यं समर्पयामि ।
ॐ श्री महागणपतये नमः - नीराजनं समर्पयामि ।
ॐ श्री महागणपतये नमः – समस्त भक्त्योपचारान् समर्पयामि ।

अथ संकल्पः

प्रणवस्य परब्रह्म ऋषिः | परमात्मा देवता | गायत्री छन्दः | आसनः प्राणायामे विनियोगः |
ॐ भूः ॐ भुवः ॐ सुवः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं
ॐ तत्सवितृ वरेण्यं भर्गो देवस्य धीमहि | धीयो यो नः प्रचोदयात् |
ओमापः ज्योतीरसः अमृतं ब्रह्म भूर्भुवस्सुवरोम् |
ममोपात्त समस्त दुरितक्षयद्वारा
आद्य ब्राह्मणः द्वितीयपरार्धे वैवस्वत मन्वंतरे कलियुगे प्रथमे पादे षष्ठि संवत्सराणां मध्ये
?????? नाम संवत्सरे ??????यने ????? मासे
????? पक्षे ????? वासरे ?????
शुभ तिथौ शुभ नक्षत्रे
अस्मिन् मुहूर्ते अस्माकं सह कुटुम्बानां अस्य बन्धु मित्राणां
ज्ञान वैराग्य विद्या विनय वीर्य विजय आयुः आरोग्य
सकल पुरुषार्थ सिध्यर्थं मंगळकर सकल अवाप्यर्थं
श्री वरसिद्धि विनायक स्वामि प्रीत्यर्थं
श्री वरसिद्धि विनायक स्वामिं उद्दिश्य
श्री वरसिद्धि विनायक पूजां करिष्ये ||

अथ ध्यानं

गणाधिप नमस्तुभ्यं सर्व सिद्धि प्रदायक |
गृहाण देवदेवेश गणेशः प्रीयतामिति ||
ध्यायेत् गजाननं देवं तप्तकांचन सुप्र भं |
चतुर्भुजं महाकायं सूर्यकोटि समप्रभं ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | ध्यानं समर्पयामि ||

अथ आवाहनं

आगच्छ विघ्न राजेंद्र स्थाने चात्र स्थिरो भव |
आराधयिष्ये भक्तोहं भवंतं सर्वसिद्धिदं ||
सिंधूरारुण वर्णाभं कुंकुमान्कित मालिनं |
सर्वविघ्न क्षयकरं सिद्धिदं सर्वकामदं ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | आवाहनं समर्पयामि ||

अथ आसनम्

अस्मिन् स्थाने अखिलाराध्य सर्वालंकार भूषित |
उपविष्य गणाध्यक्ष कार्य सिद्धिं कुरुश्व मे ||
चतुर्भुजं महाकायं पूर्ण चंद्र समप्रभं |
एकदंतं शूर्पकर्णं पूर्ण मोदक धारिणं ||

ॐ श्री वरसिद्धिविनायक स्वामिने नमः | आसनम् समर्पयामि ||

अथ पाद्यम्

इंद्रादिवंदितं देवं सिद्धगंधर्व सेवितं |
पाद्यं गृहाण देवेश विनायक नमोस्तुते ||

ॐ श्री वरसिद्धिविनायक स्वामिने नमः | पाद्यम् समर्पयामि ||

अथ अर्घ्यम्

गजानन महाकाय नागयज्ञोपवीतिने |
सूर्यकोटि प्रतीकाश गृहाणार्घ्यं नमोस्तुते ||

ॐ श्री वरसिद्धिविनायक स्वामिने नमः | अर्घ्यम् समर्पयामि ||

अथ आचमनीयं

विघ्नेश देवदेवेश सर्वसिद्धि प्रदायक |
मयादत्तं गजमुख गृहाणाचमनीयकं ||

ॐ श्री वरसिद्धिविनायक स्वामिने नमः | आचमनीयं समर्पयामि ||

अथ स्नानीयं

गंगाजल समायुक्तं सुवर्ण घटपूरितं |
गृहाणत्वं मयादत्तं स्नानं च द्विरदानन ||

ॐ श्री वरसिद्धिविनायक स्वामिने नमः | स्नानीयं समर्पयामि ||

अथ पञ्चामृत स्नानं

कामधेनु समुद्भूतम् परमं पावनं पयः |
तेन स्नानं कुरुश्व त्वं हेरंब गणनायक |||

ॐ श्री वरसिद्धिविनायक स्वामिने नमः क्षीरेणस्नपयामि |

चंद्र मंडल संकाशं सर्वदेवप्रियं दधि |
स्नानार्थं ते प्रयच्चामि गृहाण गणनायक ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः दध्यास्नपयामि |
आज्यं सुराणां आहार आज्यं यज्ञे प्रतिष्टितं |
आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यतां ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः आज्येनस्नपयामि |
सर्वौषधि समायुक्तं पीयुष सदृशं मधु |
स्नानार्थं ते प्रयच्चामि गृहाण गिरिजासुत ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः मधुनास्नपयामि |
इक्शुदंड समुद्भूत दिव्यशर्कराह्यहं |
स्नापयामि महाभाक्त्या प्रीतोभव शिवात्मजा ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः शर्करयास्नपयामि |
सुफ़लैश्च फ़लोर्दैवा फ़लानां च रसैर्युतं |
फ़लोदकं मयादत्तं गृहाण गणनायक ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः फलोदकेनस्नपयामि |
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | पञ्चामृत स्नानं समर्पयामि ||
गंगादि सलिलं शुध्धं सुवर्नकळषे स्तिथं |
सुवासितं परिमलैः स्नापयामि गणेश्वर ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः पञ्चामृत स्नानान्तरं शुद्धोदक स्नानं समर्पयामि |

अथ वस्त्रम्

रक्तवर्णं वस्त्रयुग्मं सर्वकामार्थसिध्धये |
मयादत्तं गणाध्यक्ष ग्रुह्यतामखिलार्थद ||
नभः कर्पासजं देवदेवांग सदृशं प्रभो |
गृहाण देवदेवेश वस्त्रयुग्मं च भक्तितः ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | वस्त्रम् समर्पयामि ||

अथ यज्ञोपवीतम्

धारणार्थं ब्रह्मसूत्रं सौवर्णं चोत्तरीयकं |
वक्रतुंड गृहाणेदं भक्तानां वरदायक ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | यज्ञोपवीतम् समर्पयामि ||

गन्धम्

चंदनागरु कर्पूर कुंकुमेन समन्वितं |
गंधं गृहाण देवेश सर्वसिध्धि प्रदायक ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | गन्धम् समर्पयामि ||

अथ अक्षतः हरिद्रा कुङ्कुम इत्यादि

अक्षतां च सुरश्रेष्ट कुंकुमाक्तान् सुशोभनान् |
गृहाण विघ्नराजेंद्र रुद्रप्रियाय नमोस्तुते ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | अक्षतान् समर्पयामि |

अथ पुष्पम्

रक्तपुष्पाणि सर्वेश एकविंशति संख्यया |
गृहाण सुमुखो भूत्वा मयादतान्युमासुत ||
कमलोत्पल कल्हार पुन्नाग बृहतीनि च |
नानाविधानि दिव्यानि पुष्पाणि प्रतिगृह्यतां ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | नानाविध परिमल पत्र पुष्पाणि समर्पयामि ||

अथ अष्टोत्तर शतनामावली

***|| श्री गणपति अष्टोत्तर शतनामावली ||***

ॐ श्री वरसिद्धिविनायक स्वामिने नमः | अष्टोत्तर शतनामावली समर्पयामि ||

अथ धूपम्

दशांगं गुग्गुलोपेतं धूपमुत्तमं गणनायक |
गृहाण देवदेवेश उमासुत नमोस्तुते ||
वनस्पति रसैर्दिव्यै गंधादैः गंध उत्तमैः |
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | धूपं आघ्रापयामः ||

अथ दीपम्

घृतवर्ति संयुक्तं दीपं ज्नानप्रकाशकं |
गृहाणेदं मयादत्तं तेजोराशे जगत्पते ||
साज्यं त्रिवर्ति संयुक्तं वन्हिना योजितं मया |
भक्त्या दीपं प्रदास्यामि गृहाण गणनायक ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | एकार्ति दीपम् दर्शयामि ||

अथ नैवेद्यम्

नैवेद्यं गृह्यतां देव नानामोदक नम्युतं |
पक्वान्न फ़ल संयुक्तं शड्रसैश्च समन्वितं ||
अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं |
भक्त्या निवेदितुं देव नैवेद्यं प्रतिगृह्यतां ||
ॐ अमृतमस्तु अमुतोपस्थरणमसी स्वाहा |
ॐ प्राणाय स्वाहा | ॐ अपानाय स्वाहा | ॐ व्यानाय स्वाहा |
ॐ उदानाय स्वाहा | ॐ समानाय स्वाहा | ॐ ब्रह्मणे स्वाहा ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | नैवेद्यम् निवेदयामि ||

अथ मन्गळनिराजनं

पंचवर्ती समायुक्तं वन्हिनायोजितं मया |
गृहाण मंगळं दीपं विघ्नराज नमोस्तुते ||
नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेस्तु लंबोदराय
एकदंताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | मन्गळनिराजनं समर्पयामि ||

अथ मन्त्रपुष्पं

नमो नरगजाकृते नलिनदेहाकृते
नरासुर सुरेडिता श्रुतिशिरोद्यदोंघ्रि द्वया |
नगेश्वर वरात्मजा नयनपद्म भानोमया
नतार्तिहरणां घ्रीयक् कलितमिव पुष्पांजलिः ||
तत्पुरुस्हाय विद्महे वक्रतुंडाय धीमहि| तन्नो दंतिः प्रचोदयात् ||

योपां पुष्पं वेद | पुष्पवान् प्रजावान् पशुमान् भवति | चन्द्रमा वा अपां पुष्पं |
पुष्पवान् प्रजावान् पशुमान् भवति | य एवं वेद | योऽपामायतनं वेद |
आयतनवान् भवति ||
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्टितः | तस्यः प्रकृति लीनस्य यः परः स्समहेष्वरः ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | मन्त्रपुष्पं समर्पयामि ||

अथ प्रदक्षिण नमस्कार
यानि कानि च पापानि जन्मान्तर कृतानि च |
तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे ||
ॐ श्री वरसिद्धिविनायक स्वामिने नमः | प्रदक्षिण नमस्कारान् समर्पयामि ||

अथ पुनः पूजा
ॐ श्री वरसिद्धिविनायक स्वामिने नमः समस्त राजोपचारान् भक्त्योपचारान्
शक्त्योपचरान् समर्पयामि ||

अथ प्रायश्चित्त
यस्यस्मृत्याच नामोक्त्या तपः पूजा क्रियादिषु |
न्यूनं संपूर्णतां यातु तद्यो वन्दे तमच्युतं ||
मन्त्रहीनं क्रियाहीनं भक्तिहीनं गणेश्वर |
यत्पूजितं मया देवा परिपूर्णं कुरुष्व मे ||

अथ क्षमापणम्
आवाहनं न जानामि न जानामि विसर्जनम् |
पूजां चैव न जानामि क्षमस्व परमोत्तम ||
अन्यथा शरणं नास्ति त्वमेव शरणं मम |
तस्मात् कारुण्य भावेन रक्ष रक्ष पुरुषोत्तम ||

अथ आत्मनिवेदनम्
कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मनावा प्रकृतेः स्वभावात् |
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ||

अथ उद्यापनम्
शोभनार्थे शुभमुहुर्ते दिने दिने पुनरागमनायच |

प्रसीद प्रसीद तुष्ट्यर्थं प्रविश्य हृदयं मम ॥

ॐ श्री वरसिद्धिविनायक स्वामिने नमः । यथास्थानं प्रतिष्टापयामः ॥

अथ शन्तिमन्त्राः

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ श्री गुरुभ्यो नमः । हरिः ॐ ॥

॥ श्री गुरुभ्यो नमः । हरिः ॐ ॥

# *śrī varasiddhi vināyaka pūjā vidhānam*

**dhruvante rājā varuṇo dhruvaṃ devo bṛhaspatiḥ |**
**druvanta indraścāgniśca rāṣṭraṃ dhārayatāṃ dhruvaṃ ||**

**sulagnā sāvādhāna | sumuhūrtā savādhānā | śrī mahāgaṇapati dhyānā sāvadhānā |**

*atha ghaṇṭhānādaḥ*
**āgamārthaṃ tu devānāṃ gamanārthaṃ tu rakṣasāṃ |**
**kurve ghaṇṭāravaṃ tatra devatāhvānalāñchanam ||**

*atha gaṇeśa prārthanā*
**śuklāṃbaradharaṃ viṣṇuṃ śaśivarṇaṃ caturbhujaṃ |**
**prasanna vadanaṃ dhyāyet sarvavighnopaśāṃtaye ||**

**oṃ sumukhāya namaḥ | oṃ ekadantāya namaḥ | oṃ kapilāya namaḥ |**
**oṃ gajakarṇakāya namaḥ | oṃ laṃbodarāya namaḥ |**
**oṃ vikaṭāya namaḥ | oṃ vighnarājāya namaḥ |**
**oṃ gaṇādhyakṣāya namaḥ | oṃ dhūmaketave namaḥ |**
**oṃ gaṇādhipāya namaḥ | oṃ phālacandrāya namaḥ |**
**oṃ gajānanāya namaḥ |**
**oṃ śrī mahāgaṇapataye namaḥ – nāma pūjāṃ samarpayāmi |**
**oṃ śrī mahāgaṇapataye namaḥ – nānāvidha patra puṣpāṇi samarpayāmi**
**oṃ śrī mahāgaṇapataye namaḥ - dhūpamāghrāpayāmi |**
**oṃ śrī mahāgaṇapataye namaḥ - dīpaṃ darśayāmi |**
**oṃ śrī mahāgaṇapataye namaḥ - naivedyaṃ samarpayāmi |**
**oṃ śrī mahāgaṇapataye namaḥ - nīrājanaṃ samarpayāmi |**
**oṃ śrī mahāgaṇapataye namaḥ – samasta bhaktyopacārān samarpayāmi**

*atha saṃkalpaḥ*
**praṇavasya parabrahma ṛṣiḥ | paramātmā devatā | gāyatrī chandaḥ |**
**āsanaḥ prāṇāyāme viniyogaḥ |**

**oṃ bhūḥ oṃ bhuvaḥ oṃ suvaḥ oṃ mahaḥ oṃ janaḥ oṃ tapaḥ oṃ satyaṃ oṃ tatsavitṛ vareṇyaṃ bhargo devasya dhīmahi | dhīyo yo naḥ pracodayāt |**

**omāpaḥ jyotīrasaḥ amṛtaṃ brahma bhūrbhuvassuvarom |**

**mamopātta samasta duritakṣayadvārā**
**ādya brāhmaṇaḥ dvitīyaparārdhe vaivasvata manvaṃtare kaliyuge prathame pāde ṣaṣṭhi saṃvatsarāṇāṃ madhye ?????? nāma saṃvatsare ??????yane ????? māse**
**????? pakṣe ????? vāsare ?????**
**śubha tithau śubha nakṣatre**
**asmin muhūrte asmākaṃ saha kuṭumbānāṃ asya bandhu mitrāṇāṃ**
**jñāna vairāgya vidyā vinaya vīrya vijaya āyuḥ ārogya**
**sakala puruṣārtha sidhyarthaṃ maṃgalakara sakala avāpyarthaṃ**
**śrī varasiddhi vināyaka svāmi prītyarthaṃ**
**śrī varasiddhi vināyaka svāmiṃ uddiśya**
**śrī varasiddhi vināyaka pūjāṃ kariṣye ||**

*atha dhyānaṃ*

**gaṇādhipa namastubhyaṃ sarva siddhi pradāyaka |**
**gṛhāṇa devadeveśa gaṇeśaḥ prīyatāmiti ||**

**dhyāyet gajānanaṃ devaṃ taptakāṃcana supra bhaṃ |**
**caturbhujaṃ mahākāyaṃ sūryakoṭi samaprabhaṃ ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | dhyānaṃ samarpayāmi ||

*atha āvāhanaṃ*

**āgaccha vighna rājeṃdra sthāne cātra sthiro bhava |**
**ārādhayiṣye bhakthaṃ bhavaṃtaṃ sarvasiddhidaṃ ||**

**siṃdhūrāruṇa varṇābhaṃ kuṃkumānkita mālinaṃ |**
**sarvavighna kṣayakaraṃ siddhidaṃ sarvakāmadaṃ ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | āvāhanaṃ samarpayāmi ||

*atha āsanam*

**asmin sthāne akhilārādhya sarvālaṃkāra bhūṣita |**
**upaviṣya gaṇādhyakṣa kārya siddhiṃ kuruśva me ||**

**caturbhujaṃ mahākāyaṃ pūrṇa caṃdra samaprabhaṃ |**
**ekadaṃtaṃ śūrpakarṇaṃ pūrṇa modaka dhāriṇaṃ ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | āsanam samarpayāmi ||

*atha pādyam*
**iṃdrādivaṃditaṃ devaṃ siddhagaṃdharva sevitaṃ |**
**pādyaṃ gṛhāṇa deveśa vināyaka namostute ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | pādyam samarpayāmi ||

*atha arghyam*
**gajānana mahākāya nāgayajñopavītine |**
**sūryakoṭi pratīkāśa gṛhāṇārghyaṃ namostute ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | arghyam samarpayāmi ||

*atha ācamanīyaṃ*
**vighneśa devadeveśa sarvasiddhi pradāyaka |**
**mayādattaṃ gajamukha gṛhāṇācamanīyakaṃ ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | ācamanīyaṃ samarpayāmi ||

*atha snānīyaṃ*
**gaṃgājala samāyuktaṃ suvarṇa ghaṭapūritaṃ |**
**gṛhāṇatvaṃ mayādattaṃ snānaṃ ca dviradānana ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | snānīyaṃ samarpayāmi ||

*atha pañcāmṛta snānaṃ*
**kāmadhenu samudbhūtam paramaṃ pāvanaṃ payaḥ |**
**tena snānaṃ kuruśva tvaṃ heraṃba gaṇanāyaka ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ kṣīreṇasnapayāmi |

**caṃdra maṃḍala saṃkāśaṃ sarvadevapriyaṃ dadhi |**
**snānārthaṃ te prayaccāmi gṛhāṇa gaṇanāyaka ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ dadhyāsnapayāmi |

**ājyaṃ surāṇāṃ āhāra ājyaṃ yajñe pratiṣṭitaṃ |**
**ājyaṃ pavitraṃ paramaṃ snānārthaṃ pratigṛhyatāṃ ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ ājyenasnapayāmi |

**sarvauṣadhi samāyuktaṃ pīyuṣa sadṛśaṃ madhu |**
**snānārthaṃ te prayaccāmi gṛhāṇa girijāsuta ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ madhunāsnapayāmi |

**ikśudaṃḍa samudbhūta divyaśarkarāhyahaṃ |**
**snāpayāmi mahābhāktyā prītbhava śivātmajā ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ śarkarayāsnapayāmi |

**suphalaiśca phalordaivā phalānāṃ ca rasairyutaṃ |**
**phalodakaṃ mayādattaṃ gṛhāṇa gaṇanāyaka ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ phalodakenasnapayāmi |

oṃ śrī varasiddhivināyaka svāmine namaḥ | pañcāmṛta snānaṃ samarpayāmi ||

**gaṃgādi salilaṃ śudhdhaṃ suvarnakalaṣe stithaṃ |**
**suvāsitaṃ parimalaiḥ snāpayāmi gaṇeśvara ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ pañcāmṛta snānāntaraṃ śuddhodaka snānaṃ samarpayāmi |

*atha vastram*

**raktavarṇaṃ vastrayugmaṃ sarvakāmārthasidhdhaye |**
**mayādattaṃ gaṇādhyakṣa gruhyatāmakhilārthada ||**

**nabhaḥ karpāsajaṃ devadevāṃga sadṛśaṃ prabho |**
**gṛhāṇa devadeveśa vastrayugmaṃ ca bhaktitaḥ ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | vastram samarpayāmi ||

*atha yajñopavītam*

**dhāraṇārthaṃ brahmasūtraṃ sauvarṇaṃ cottarīyakaṃ |**
**vakratuṃḍa gṛhāṇedaṃ bhaktānāṃ varadāyaka ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | yajñopavītam samarpayāmi ||

*gandham*
**caṃdanāgaru karpūra kuṃkumena samanvitaṃ |**
**gaṃdhaṃ gṛhāṇa deveśa sarvasidhdhi pradāyaka ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | gandham samarpayāmi ||

*atha akṣataḥ haridrā kuṅkuma ityādi*
**akṣatāṃ ca suraśreṣṭa kuṃkumāktān suśobhanān |**
**gṛhāṇa vighnarājeṃdra rudrapriyāya namostute ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | akṣatān samarpayāmi |

*atha puṣpam*
**raktapuṣpāṇi sarveśa ekaviṃśati saṃkhyayā |**
**gṛhāṇa sumukho bhūtvā mayādatānyumāsuta ||**

**kamalotpala kalhāra punnāga bṛhatīni ca |**
**nānāvidhāni divyāni puṣpāṇi pratigṛhyatāṃ ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | nānāvidha parimala patra puṣpāṇi samarpayāmi ||

*atha aṣṭṭottara śatanāmāvalī*
**|| śrī gaṇapati aṣṭottara śatanāmāvalī ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | aṣṭottara śatanāmāvalī samarpayāmi ||

*atha dhūpam*
**daśāṃgaṃ guggulopetaṃ dhūpamuttamaṃ gaṇanāyaka |**
**gṛhāṇa devadeveśa umāsuta namostute ||**

**vanaspati rasairdivyai gaṃdhādaiḥ gaṃdha uttamaiḥ |**
**āghryaḥ sarvadevānāṃ dhūpoyaṃ pratigṛhyatāṃ ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | dhūpaṃ āghrāpayāmaḥ ||

*atha dīpam*
**ghṛtavarti saṃyuktaṃ dīpaṃ jnānaprakāśakaṃ |**
**gṛhāṇedaṃ mayādattaṃ tejorāśe jagatpate ||**

**sājyaṃ trivarti saṃyuktaṃ vanhinā yojitaṃ mayā |**
**bhaktyā dīpaṃ pradāsyāmi gṛhāṇa gaṇanāyaka ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | ekārti dīpam darśayāmi ||

*atha naivedyam*
**naivedyaṃ gṛhyatāṃ deva nānāmodaka namyutaṃ |**
**pakvānna phala saṃyuktaṃ śaḍrasaiśca samanvitaṃ ||**

**annaṃ caturvidhaṃ svādu rasaiḥ ṣaḍbhiḥ samanvitaṃ |**
**bhaktyā niveditum̩ deva naivedyaṃ pratigṛhyatāṃ ||**

**oṃ amṛtamastu amrutopastharaṇamasī svāhā |**
**oṃ prāṇāya svāhā | oṃ apānāya svāhā | oṃ vyānāya svāhā |**
**oṃ udānāya svāhā | oṃ samānāya svāhā | oṃ brahmaṇe svāhā ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | naivedyam nivedayāmi ||

*atha mangalanirājanaṃ*
**paṃcavartī samāyuktaṃ vanhināyojitaṃ mayā |**
**gṛhāṇa maṃgalaṃ dīpaṃ vighnarāja namostute ||**

**namo vrātapataye namo gaṇapataye namaḥ pramathapataye**
**namastestu laṃbodarāya ekadaṃtāya vighnanāśine śivasutāya**
**śrīvaradamūrtaye namaḥ ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | mangalanirājanaṃ samarpayāmi ||

*atha mantrapuṣpaṃ*
**namo naragajākṛte nalinadehākṛte narāsura**
**sureḍitā śrutiśirodyadṃghri dvayā |**
**nageśvara varātmajā nayanapadma bhānomayā**
**natārtiharaṇāṃ ghrīyak kalitamiva puṣpāṃjaliḥ ||**

**tatpurushāya vidmahe vakratuṃḍāya dhīmahi|**
**tanno daṃtiḥ pracodayāt ||**

**yopāṃ puṣpaṃ veda | puṣpavān prajāvān paśumān bhavati |**
**candramā vā apāṃ puṣpaṃ |puṣpavān prajāvān paśumān bhavati |**
**ya evaṃ veda | yo'pāmāyatanaṃ veda |āyatanavān bhavati ||**

**yo vedādau svaraḥ prokto vedānte ca pratiṣṭitaḥ |**
**tasyaḥ prakṛti līnasya yaḥ paraḥ ssamaheṣvaraḥ ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | mantrapuṣpaṃ samarpayāmi ||

*atha pradakṣiṇa namaskāra*
**yāni kāni ca pāpāni janmāntara kṛtāni ca |**
**tāni tāni vinaśyanti pradakṣiṇa pade pade ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | pradakṣiṇa namaskārān samarpayāmi ||

*atha punaḥ pūjā*
**oṃ śrī varasiddhivināyaka svāmine namaḥ samasta rājopacārān bhaktyopacārān śaktyopacarān samarpayāmi ||**

*atha prāyaścitta*
**yasyasmṛtyāca nāmoktyā tapaḥ pūjā kriyādiṣu |**
**nyūnaṃ saṃpūrṇatāṃ yātu tadyo vande tamacyutaṃ ||**

**mantrahīnaṃ kriyāhīnaṃ bhaktihīnaṃ gaṇeśvara |**
**yatpūjitaṃ mayā devā paripūrṇaṃ kuruṣva me //**

*atha kṣamāpaṇam*
**āvāhanaṃ na jānāmi na jānāmi visarjanam |**
**pūjāṃ caiva na jānāmi kṣamasva paramottama ||**

**anyathā śaraṇaṃ nāsti tvameva śaraṇaṃ mama |**
**tasmāt kāruṇya bhāvena rakṣa rakṣa puruṣottama ||**

*atha ātmanivedanam*
**kāyena vācā manasendriyairvā budhyātmanāvā prakṛteḥ svabhāvāt |**
**karomi yadyat sakalaṃ parasmai nārāyaṇāyeti samarpayāmi ||**

*atha udyāpanam*

**śobhanārthe śubhamuhurte dine dine punarāgamanāyaca |**
**prasīda prasīda tuṣṭyarthaṃ praviśya hṛdayaṃ mama ||**

oṃ śrī varasiddhivināyaka svāmine namaḥ | yathāsthānaṃ pratiṣṭāpayāmaḥ ||

*atha śantimantrāḥ*

**oṃ pūrṇamadaḥ pūrṇamidaṃ pūrṇāt pūrṇamudacyate |**
**pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate ||**

**oṃ śāntiḥ śāntiḥ śāntiḥ ||**

॥ श्री गुरुभ्यो नमः । हरिः ॐ ॥